चन्द्रतयाध्यवसानादतिशयोक्तिः,उत इदमिति सुखं निर्दिश्य चन्द्रत्वारोपाद्रूपकं, अथ वा इदमिति सुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रकृतयोरेकधर्म्माभिसम्बन्धात्तुल्ययोगिता, आहोस्विच्चन्द्रस्याप्रकृतत्वाद्दीपकं किं वा विशेषणसाम्यादप्रस्तुतस्य सुखस्य गम्यत्वात् समासोक्तिः, यद्वा ऽप्रस्तुतस्य सुखस्यावगतिरित्यप्रस्तुतप्रशंसा, यद्वा मन्मथोद्दीपनः कालः स्वकार्य्यभूतचन्द्रवर्णनामुखेन वर्णित इति पर्य्यायोक्तिरिति बहूनामलङ्काराणां सन्देहात् सन्देहसङ्करः। यथा वा सुखचन्द्रं पश्यामीत्यत्र किं सुखं चन्द्र इवेत्युपमा उत चन्द्र एवेति रूपकमिति सन्देहः साधकबाधकयोर्द्वयोरेकतरस्य सद्भावे पुनर्न सन्देहः। यथा "सुखचन्द्रं चुम्बति" इत्यत्र चुम्बनं सुखस्यानुकूलमित्युपमायाः साधकम्। चन्द्रस्य तु प्रतिकूलमिति रूपकस्य बाधकम्, "सुखचन्द्रः प्रकाशते" इत्यत्र प्रकाशाख्यो धर्म्मो रूपकस्य साधको सुखे उपचरितत्वेन सम्भवतीति नोपमाबाधकः। "राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्"। अत्र योषित आलिङ्गनं नायकस्य सदृशेनोचितमिति लक्ष्म्यालिङ्गनस्य राजन्यसम्भवादुपमाबाधकं नारायणे सम्भवाद्रूपकम्। "एवं वदानम्बुजमेणाक्ष्या भाति चञ्चललोचनम्"। अत्र वदने लोचनस्य सम्भवादुपमायाः साधकता, अम्बुजे चासम्भवाद्रूपकस्य बाधकता। एवं "सुन्दरं वदनाम्बुजम्" इत्यादौ साधारणधर्म्मप्रयोगे, "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति वचनादुपमासमासो न सम्भवतीति उपमाया बाधकः। एवञ्चात्र मयूरव्यंसकादित्वाद्रूपकसमास एव। एकाश्रयानुप्रवेशो यथा। "कटाक्षेणापीषत् क्षणमपि निरीक्षेत यदि सा तदानन्दः सान्द्रः स्फुरति पिहिताशेषविषयः।सरोमाञ्चोदञ्चत्कुचकलशनिर्भिन्नवसनः परीरम्भारम्भः क इव भविताम्भोरुहदृशः"॥ अत्र "कटाक्षेणापीषत्क्षणमपि" इत्यत्र छेकानुप्रासस्य "निरीक्षेत" इत्यत्र क्षकारमादाय वृत्त्यनुप्रासस्य चैकाश्रयेऽनुप्रवेशः। एवं चात्रैवानुप्रासार्थापत्त्यलङ्कारयोः। यथा वा। "कुरवका रवकारणतां ययुरिति" अत्र रवकारवका इत्येकं वकारवकार इत्येकमिति यमकयोः। सा०द०।

११६ सन्देहः "स्यात् स्मृतिभ्रान्तिसन्देहैस्तदङ्कालङ्कृतित्रयम्" च० "पङ्कजं वा सुधांशुर्वा अस्माकन्तु न निर्णयः"॥

११७ समम् "समं स्यादानुरूप्येण श्लाघायोग्यस्य वस्तुनः"। सा०द० "शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्याऽवतीर्णा"। आनुरूप्यञ्च कारणानुरूप्यं तदन्यानुरूप्यम् इष्टपदार्थस्यायत्नसिद्धिहेतुकत्वञ्च। "सरूपमपि कार्य्यस्य कारणेन समं विदुः। विना यत्नेन। तत्सिद्धिर्यदर्थं कर्त्तुमुद्यममिति" च०उक्तेः तत्राकारणानुरूप्यमुक्तम् कारणानुरूप्यं यथा "नीचप्रवणता लक्ष्मि! जलजायास्तवोचिता"। तृतीयं यथा "युक्तोवारणलाभोऽयं भूपतेर्वारणार्थिनः"।

११८ समाधिः "समाधिः सुकरे कार्य्ये दैवाद्वस्त्वन्तरागमात्" च०। "मानमस्या निराकर्त्तुं पादयोर्मे पतिष्यतः। उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम्"। स० कण्ठा० तु "समाधिमन्यधर्म्माणामन्यत्रारोपणं विदुः। निरुद्भेदोऽथ सोद्भेदः स द्विधा परिपठ्यते" इति लक्षितम्। उदाहरणं मृग्यम्।

११९ समासोक्तिः "समासोक्तिः समैर्यत्र कार्य्यलिङ्गविशेषणैः। व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः" सा०द०॥तत्र समेन कार्य्येण प्रस्तुतेऽप्रस्तुतव्यवहारसमारोपः यथा। "व्याधूय यद्वसनमम्बुजलोचनाया वक्षोजयोः कनककुम्भविलासभाजोः। आलिङ्गसि प्रसभमङ्गमशेषमस्या धन्यस्त्वमेव मलयाचलगन्धवाह!"।अत्र गन्धवाहे हठकामुकव्यवहारसमारोपः। लिङ्गसाम्येन यथा। "असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः। अनाक्रम्य जगत् कृत्स्नं नो सन्ध्यां भजते रविः"॥ अत्र पुंस्त्रीलिङ्गत्वमात्रेण रविसन्ध्ययोर्नायकनायिकाव्यवहारः। विशेषणसाम्यन्तु श्लिष्टतया साधारण्येनौपम्यगर्भत्वेन च त्रिधा। तत्र श्लिष्टतया यथा। "विकसितमुखीं रागासङ्गाद्गलत्तिमिरावृतिं दिनकरकरस्पृष्टामैन्द्रीं निरीक्ष्य दिशं पुरः। जरठलवलीपाण्डुच्छायो भृशं कलुषान्तरः श्रयति हरितं हन्त प्राचेतसीं तुहिनद्युतिः"॥ अत्र मुखरागादि श्लिष्टता। अन्यदुदाहार्य्यं सा०द०।

१२० समुच्चयः "समुच्चयोऽयमेकस्मिन् सति कार्य्यस्य साधके। खलेकपोतिकान्यायात्तत्करः स्यात् परोऽपि चेत्॥ गुणौ क्रिये वा युगपत् स्यातां यद्वा गुणक्रिये"सा०द०।यथा। "हंहो धीर! समीर! हन्त जननं ते चन्दनक्ष्माभृतो दाक्षिण्यं जगदुत्तरं परिचयो गोदावरीवारिभिः। प्रत्यङ्गं दहसीह मे त्वमपि चेदुद्दामदावाग्निवन्मत्तोऽयं मलिनात्मको वनचरः किं वक्ष्यते कोकिलः"॥ अत्र दाहे एकस्मिंश्चन्दनभूभृज्जन्मरूपे कारणे सत्यपि दाक्षिण्यादीनां हेत्वन्तराणामुपादानम्। अत्र सर्व्वेषामपि हेतूनां शोभनत्वात् सद्योगः। अत्रैव चतुर्थपादे मत्तादीनामशोभनानां योगादसद्योगः। सदसद्योगो यथा।